# শ্রীবেঙ্কটেশ্বরনবরত্নমালিকাস্তুতিঃ

{॥ শ্রীবেঙ্কটেশ্বরনবরত্নমালিকাস্তুতিঃ ॥}

শ্রীমানম্ভোধিকন্যাবিহরণভবনীভূতবক্ষঃপ্রদেশঃ

ভাস্বদ্ভোগীন্দ্রভূমীধরবরশিখরপ্রান্তকেলীরসজ্ঞঃ ।

শশ্বদ্ব্রহ্মেন্দ্রবহ্নিপ্রমুখসুরবরারাধ্যমানাঙ্ঘ্রিপদ্মঃ

পায়ান্মাং বেঙ্কটেশঃ প্রণতজনমনঃকামনাকল্পশাখী ॥ ১॥

যস্মিন্ বিশ্বং সমস্তং চরমচরমিদং দৃশ্যতে বৃদ্ধিমেতি

ভ্রশ্যত্যন্তে চ তাদৃগ্বিভববিলসিতস্সোঽয়মানন্দমূর্তিঃ ।

পদ্মাবাসামুখাম্ভোরুহমদ ধু মধুবিদ্বিভ্রমোন্নিদ্রচেতাঃ

শশ্বদ্ভূয়াদ্বিনম্রাখিলমুনিনিবহো ভূয়সে শ্রেয়সে মে ॥ ২॥

বন্দে দেবং মহান্তং দরহসিতলসদ্বক্ত্রচন্দ্রাভিরামং

নব্যোন্নিদ্রাবদাতাম্বুজরুচিরবিশালেক্ষণদ্বন্দ্বরম্যম্ ।

রাজন্মার্তাণ্ডতেজঃপ্রসিতশুভমহাকৌস্তুভোদ্ভাস্যুরস্কং

শান্তং শ্রীশঙ্খচক্রাদ্যমলকরযুতং ভব্যপীতাম্বরাঢ্যম্ ॥ ৩॥

পায়াদ্বিশ্বস্য সাক্ষী প্রভুরখিলজগৎকারণং শাশ্বতোঽয়ং

পাদপ্রহ্বাঘরাশিপ্রশমননিভৃতাম্ভোধরপ্রাভবো মাম্ ।

ব্যক্তাব্যক্তস্বরূপো দুরধিগমপদঃ প্রাক্তনীনাং চ বাচাং

ধ্যেযো যোগীন্দ্রচেতস্সরসিজনিয়তানন্দদীক্ষাবিহারঃ ॥ ৪॥

আদ্যং তেজোবিশেষৈরুপগতদশদিঙ্মণ্ডলাভ্যন্তরালং

সূক্ষ্মং সূক্ষ্মাতিরিক্তং ভবভয়হরণং দিব্যভব্যস্বরূপম্ ।

লক্ষ্মীকান্তং খগেন্দ্রধ্বজমঘশমনং কামিতার্থৈকহেতুং

বন্দে গোবিন্দমিন্দীবরনবজলদশ্যামলং চারুহাসম্ ॥ ৫॥

রাকাচন্দ্রোপমাস্যং ললিতকুবলযশ্যামমম্ভোজনেত্রং

ধ্যাযাম্যাজানুবাহুং হলনলিনগদাশার্ঙ্গরেখাঙ্কিতাঙ্ঘ্রিম্ ।

কারুণ্যাঞ্চৎকটাক্ষং কলশজলধিজাপীনবক্ষোজকোশা-

শ্লেষাবাতাঙ্গরাগোচ্ছ্যললিতনবাঙ্কোরুবক্ষস্স্থলাঢ্যম্ ॥ ৬॥

শ্রীমৎসংপূর্ণশীতদ্যুতিহসনমুখং রম্যবিম্বাধরোষ্ঠং

গ্রীবাপ্রালম্বিবক্ষস্স্থলসততনটদ্বৈজযন্তীবিলাসম্ ।

আদর্শৌপম্যগণ্ডপ্রতিফলিতলসৎকুণ্ডলশ্রোত্রযুগ্মং

স্তৌমি ত্বাং দ্যোতমানোত্তমমণিরুচিরানল্পকোটীরকান্তম্ ॥ ৭॥

সপ্রেমৌৎসুক্যলক্ষ্মীদরহসিতমুখাম্ভোরুহামোদলুভ্যন্-

মত্তদ্বৈরেফবিক্রীডিতনিজহৃদযো দেবদেবো মুকুন্দঃ ।

স্বস্তি শ্রীবৎসবক্ষাঃ শ্রিতজনশুভদঃ শাশ্বতং মে বিদধ্যাত্

ন্যস্তপ্রত্যগ্রকস্তূর্যনুপমতিলকপ্রোল্লসৎফালভাগঃ ॥ ৮॥

শ্রীমান্ শেষাদ্রিনাথো মুনিজনহৃদযাম্ভোজসদ্রাজহংসঃ ।

সেবাসক্তামরেন্দ্রপ্রমুখসুরকিরীটার্চিতাত্মাঙ্ঘ্রিপীঠঃ ।

লোকস্যালোকমাত্রাদ্বিহরতি রচযন্ যো দিবারাত্রলীলাং

সোঽযং মাং বেঙ্কটেশপ্রভুরধিককৃপাবারিধিঃ পাতু শশ্বত্ ॥ ৯॥

শ্রীশেষশর্মাভিনবোপবল্গৃপ্তা

প্রিযেণ ভক্ত্যা চ সমর্পিতেযম্ ।

শ্রীবেঙ্কটেশপ্রভুকণ্ঠভূষা

বিরাজতাং শ্রীনবর্ত্নমালা ॥ ১০০ ।

॥ ইতি শ্রীবেঙ্কটেশ্বরনবরত্নমালিকাস্তুতিঃ সমাপ্তা॥

Encoded and proofread by Malleswara Rao Yellapragada

malleswararaoy at yahoo.com

From a telugu book veNkaTeshakAvyakalApa

Please send corrections to sanskrit@cheerful.com

Last updated ত্oday

http://sanskritdocuments.org

Venkatesha Navaratna Malika Stuti Lyrics in Bengali PDF
% File name : shrIveMkaTeshvaranavaratnamAlikAstutiH.itx
% Location : doc_vishhnu
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : Malleswara Rao Yellapragada malleswararaoy at yahoo.com
% Proofread by : Malleswara Rao Yellapragada malleswararaoy at yahoo.com
% Source : Venkatesha Kavyakalapa

% Latest update : April 4, 2015
% Send corrections to : sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ December 10, 2015 ] at Stotram Website